श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# ॥ श्रीरङ्गनाथ पादुकासहस्रम् ॥

## ॥ परागपद्धतिः त्रयोदशी ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ परागपद्धतिः त्रयोदशी ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

पान्तु वः पद्मनाभस्य पादुकाकेळिपांसवः।
अहल्यादेहनिर्माणपर्यायपरमाणवः॥ १३.१ ॥

तव सञ्चरणाद्रजो विधूतं यदिदं रङ्गनरेन्द्रपादरक्षे !।
अलमेतदनाविलानि कर्तुं कतकक्षोद इवाशु मानसानि॥ १३.२ ॥

पुनरुक्तपितामहानुभावाः पुरुषाः केचिदमी पुनन्ति विश्वम्।
मधुवैरिपदारविन्दबन्धोः अपरागास्तव पादुके ! परागैः॥ १३.३ ॥

अभियुक्तजनो निजार्भकाणां बहुशो रङ्गनरेन्द्रपादरक्षे !।
अवलेपपिशाचमोचनार्थं रजसा लिम्पति तावकेन देहान्॥ १३.४ ॥

शिरसा परिगृह्य लोकपालास्तव रङ्गेश्वरपादुके ! रजांसि।
विषमेषु बलेषु दानवानां व्यपनीतान्यशिरस्त्रमाविशन्ति॥ १३.५ ॥

कृतिनः शिरसा समुद्वहन्तः कतिचित् केशवपादुके ! रजस्ते।
रजसस्तमसोऽपि दूरभूतं परिपश्यन्ति विशुद्धमेव सत्त्वम्॥ १३.६ ॥

अधिकं पदमाश्रितोऽपि वेधाः
    प्रयतो रङ्गधुरीणपादरक्षे !।
अभिवाञ्छति सङ्गमं परागैः
    अभिजातैस्तव देवि ! नाभिजातः॥ १३.७ ॥

शुद्धसत्त्ववपुषैव भवत्या
    पादुके ! विरजसौ हरिपादौ।
अस्तु किं पुनरिदं रजसा ते
    शुद्धसत्त्वमयता मनुजानाम्॥ १३.८ ॥

तद्रजस्तव तनोति पादुके ! मानसान्यकठिनानि देहिनाम्।
प्रस्तरस्य पदवीगतस्य यत् व्याचकार मुनिधर्मदारताम्॥ १३.९ ॥

रङ्गेशयस्य पुरुषस्य जगद्विभूत्यै
रथ्यापरिक्रमविधौ मणिपादरक्षे !।
सीमन्तदेशमनवद्यसरस्वतीनां
सिन्दूरयन्ति भवतीचरिताः परागाः॥ १३.१० ॥

मान्येन रङ्गनृपतेर्मणिपादरक्षे !
चूडापदानि रजसा तव भूषयन्तः।
कालक्रमेण भजतां कमलासनत्वं
नाभीसरोजरजसां निवसन्ति मध्ये॥ १३.११ ॥

मातर्मुकुन्दचरणावनि ! तावकीनाः
चिन्तावशीकरणचूर्णविशेषकल्पाः।
सञ्चारपांसुकणिकाः शिरसा वहन्तो
विश्वं पुनन्ति पदपद्मपरागलेशैः॥ १३.१२ ॥

आयोजितान्यमलधीभिरनन्यलभ्ये
पादावनि ! श्रुतिवधूपटवासकृत्ये।
त्वत्सञ्चरप्रचलितानि रजांसि शौरेः
प्रख्यापयन्ति पदपद्मपरागशोभाम्॥ १३.१३ ॥

मूर्धानमम्ब ! मुरभिन्मणिपादरक्षे !
येषां कदाऽपि रजसा भवती पुनाति।
त्वामेव ते सुकृतिनः स्नपयन्ति काले
मन्दारदामरजसा मकुटच्युतेन॥ १३.१४ ॥

रथ्याविहाररजसा परिधूसराङ्गीं
रङ्गेश्वरस्य ललितेषु महोत्सवेषु।
प्रस्फोटयत्यवनतो मणिपादुके ! त्वां
गौरीपतिः स्वयमिभाजिनपल्लवेन॥ १३.१५ ॥

नेदीयसां निजपरागनिवेशपूर्वं
स्पृष्ट्वा शिरांसि भवती भवरोगभाजाम्।
गाढं निपीड्य गरुडध्वजपादरक्षे !
मानग्रहं शमयतीव परैरसाध्यम्॥ १३.१६ ॥

आपातवल्लवतनोरकुमारयूनः
पादावनि ! प्रविशतो यमुनानिकुञ्जान्।
आसीदनङ्गसमरात् पुरतः प्रवृत्तः
सेनापराग इव ते पदवीपरागः॥ १३.१७ ॥

गङ्गापगातटलतागृहमाश्रयन्त्याः
पादावनि ! प्रचलितं पदवीरजस्ते।
प्रायेण पावनतमं प्रणतस्य शम्भोः
उद्धूळनं किमपि नूतनमातनोति॥ १३.१८ ॥

अन्ते तदा त्वमविळम्बितमानयन्ती
रङ्गाद् भुजङ्गशयनं मणिपादरक्षे !।
कामं निवर्तयितुमर्हसि संज्वरं मे
कर्पूरचूर्णपटलैरिव धूळिभिस्ते॥ १३.१९ ॥

रङ्गेशपादसहधर्मचरि ! त्वदीयान्
मौळौ निवेश्य महितान् पदवीपरागान्।
सन्तस्त्रिवर्गपदवीमतिलङ्घयन्तो
मौळौ पदं विदधते विबुधेश्वराणाम्॥ १३.२० ॥

मातस्तदा माधवपादरक्षे ! त्वयि प्रसक्तं त्वरयोपयान्त्याम्।
परामृशेयं पदवीपरागं प्राणैः प्रयाणाय समुज्जिहानैः॥ १३.२१ ॥

तथागता राघवपादरक्षे !
संपश्यमानेषु तपोधनेषु।
आसीदहल्या तव पांसुलेशैः
अपांसुलानां स्वयमग्रगण्या॥ १३.२२ ॥

पश्यामि पद्मोक्षणपादरक्षे ! भवाम्बुधिं पातुमिव प्रवृत्तान्।
भक्तोपयानत्वरया भवत्याः पर्यस्यमानान् पदवीपरागान्॥ १३.२३ ॥

पञ्चायुधी भूषणमेव शौरेः
    यतस्तवैते मणिपादरक्षे !।
वितन्वते व्याप्तदिशः परागाः
    शान्तोदयान् शत्रुचमूपरागान्॥ १३.२४ ॥

परिणतिमकठोरां प्राप्तया यत्प्रभावात्
    अलभत शिलया स्वान् गौतमो धर्मदारान्।
पुनरुपजनिशङ्कावारकं पादुके ! तत्
    प्रशमयति रजस्ते रागयोगं प्रजानाम्॥ १३.२५ ॥

रजनिविगमकाले रामगाथां पठन्तः
    कुशिकतनयमुख्याः पादुके ! भावयन्ते।
उपलशकलसक्तैस्त्वत्परागैरकाण्डे
    जनितमुनिकळत्रान् दण्डकारण्यभागान्॥ १३.२६ ॥

शुभसरणिरजोभिः शोभयन्ती धरित्रीं
    परिणतिरमणीयान् प्रक्षरन्ती पुमर्थान्।
भवसि भुवनवन्द्या पादुके ! रङ्गभर्तुः
    शरणमुपगतानां शाश्वती कामधेनुः॥ १३.२७ ॥

पवनतरळितस्ते पादुके ! रङ्गभर्तुः
    विहरणसमयेषु व्याप्तविश्वः परागः।
विषमविषयवर्त्मव्याकुलानामजस्रं
    व्यपनयति जनानां वासनारेणुजालम्॥ १३.२८ ॥

निष्प्रत्यूहमुपासिषीमहि मुहुर्निश्शेषदोषच्छिदो
    नित्यं रङ्गधुरन्धरस्य निगमस्तोमार्चिते पादुके !।
धत्ते मूर्धभिरादिपद्मजनिता तत्तादृशी सन्ततिः
    यत्सञ्चारपवित्रितक्षितिरजः पङ्क्तिं चतुष्पञ्चषैः॥ १३.२९ ॥

रजसा परोरजस्तन्न खलु न लङ्घेत भगवतोऽपि पदम्।
किमुत हृदयं मदीयं भवती यदि नाम पादुके ! न स्यात्॥ १३.३० ॥

॥ इति पादुकासहस्रे परागपद्धतिः त्रयोदशी ॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥